Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 5 | ISSN : 2581- 6306

# जैनसंस्कृते: एकं विहङ्गावलोकनम्



**डॉ. प्रदीपकुमारवाग्**

**सहाचार्य:, साहित्यविभाग:**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:**

**सारांश:—** यद्यपि जैनानां रीतय: अस्माभि: नास्तिकत्वेन स्वीकुर्म: तथापि तद्विषयकं ज्ञानं सर्वेषामीष्टं भवति। सनातनधर्मानुरागिन: वयं तज्ज्ञानसामान्यग्रहणाय अस्य ग्रहणं कुर्म:। अस्य सम्प्रदायस्य सिद्धान्त: अहिंसाऽऽधारितोऽस्ति। यद्यपि सम्प्रदायोऽयं नास्तिकेषु परिगण्यते तथापि नैकानि मतानि अस्य आस्तिकमततुल्यानि भवन्ति । अत एव शोधप्रबन्धेस्मिन् एतेषां विचार: मया प्रस्तूयते।

**मुख्य शब्द**– जैनः, संस्कतिः, नास्ति, ज्ञानं, सिद्धान्तः।

चार्वाक-बौद्धानामिव जैनदर्शनमपि नास्तिकदर्शनेषु अन्तर्भवति । वस्तुत: जैनबौद्धयोर्मध्ये नास्ति कश्चन भेद: इति समालोचका: अभिप्रयन्ति । उभयो: प्रादुर्भावसमय: प्राय: समान एव भवति । इतिहासतिमिरनामके ग्रन्थे शिवप्रसादनृप: जैनबौद्धयो: एकार्थवाचकत्वमङ्गीकरोति । महावीरगौतमोभयनामाभ्यां **"गणधर:"** नाम कश्चन श्रमण आसीदिति केचन कथयन्ति । परन्तु जैनसम्प्रदाये महावीरस्य एकादश शिष्या गणधरनाम्ना अभिहिता: सन्ति इति केचन । ते यथा - पृथ्वीवसुभूत्यो: त्रय: पुत्रा: (१) इन्द्रभूति: (२) वायुभूति: (३) अग्निभूतिश्च ; (४) वारुणीधर्मप्रिययो: पुत्र: व्यक्त:, (५) भादिलधम्मिल्लयो: पुत्र: सुधर्मा (६) विजयाधनदेवयो: पुत्र: मण्डित: (७) विजयामौर्ययो: पुत्र: मौर्यपुत्र: (८) जयन्तीदेवयो: पुत्र: अकम्पित: (९) नन्दावस्वो: पुत्र: अचलव्रत: (१०) वरुणदेवीदत्तयो: पुत्र: मेतार्य: (११) अभिभद्राबलयो: पुत्र: प्रभासश्चेति । जिनसम्बन्धात् "जैन"शब्द: निष्पद्यते ।

**जैनरत्नत्रयम् –** दु:खत्रयनिवृत्त्यर्थं **रत्नत्रयमे**तैरङ्गीक्रियते । यथा – १) सम्यग्दर्शनम् (Right view) २) सम्यज्ज्ञानम् (Right knowledge) ३) सम्यक् चरित्रं (Right conduct) चेति । रत्नत्रयस्यैकतैव मोक्षमार्गः । चित्पदार्थः जीवश्चेतनो वैक एव ; अचेतनः जडः पञ्चधा विभज्यते धर्माधर्माकाशकालपुद्गलभेदात् ।

**जैनसम्प्रदायभेदाः –** जैनानां द्विधा सम्प्रदायः दृश्यते, श्वेताम्बरदिगम्बरभेदात् । श्वेताम्बरसम्प्रदायोऽपि त्रिधा विभज्यते । यथा - १) मूर्त्तिपूजकः २) स्थानकवासी ३) टेरापन्थी च । एषा परम्परा महावीरस्य निर्वाणप्राप्त्यनन्तरमेव प्रारब्धेति समालोचकाः वदन्ति ।

जैनानां **पञ्च व्रतानि –** (१) अहिंसा (Nonviolence) (२) सत्यम् (Truthfulness) (३) अस्तेयव्रतम् वा अचौर्यम् (Non-steeling) (४) ब्रह्मचर्यम् (Celibacy) (५) अपरिग्रहः (Non-possession or Non-materialism) । एतानि तत्त्वानि सामासिकधर्मत्वेन मनुना प्रतिपादितानि । यथा –

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**

**एतत्सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ।।***(मनुस्मृतिः – १०/६३)*

जैनानां **षड् देवताः –** (१) सर्वज्ञः (२) वीतरागः (३) अर्हन् (४) केवली (५) तीर्थङ्करः (६) जिनश्चेति । एतासु देवतासु पदार्थानां यथार्थवक्ता, रागद्वेषादिशून्यः, त्रिलोकपूज्यः सर्वज्ञः "अर्हन्" एव परमेश्वरो भवति । जैनभिक्षवः तीर्थङ्कराः इत्युच्यन्ते । तेषामेव मुक्तिर्जायते ।

**चतुर्दश गुणस्थानानि –** निर्वाणप्राप्त्यर्थमूर्ध्वगतिशीलजीवावस्थाविशेषः गुणस्थान-मित्युच्यते । एतच्चतुर्दशविधं भवति । यथा – १) मिथ्यात्वम् २) सासादनम् (जैनसिद्धान्ते अविश्वासः) ३) मिश्रम् (जैनसिद्धान्तविषये सत्यासत्यभावनयोः समानता) ४) अविरतसम्यक्त्वम् ५) देशविरतिः (मनोनिग्रहे प्रगतिः) ६) प्रमतः ७) अप्रमत्तः ८) अपूर्वकरणम् ९) अनिवृत्तिकरणम् १०) सूक्ष्मसाम्परायः ११) उपशान्तमोहः १२) क्षीणमोहः १३) सयोगिकेवली १४) अयोगिकेवली च ।

जैनानामाश्रमः "**अपासरा**" इत्युच्यते । दिगम्बरसम्प्रदायानुसारं स्त्रीणां मुक्तिर्न भवति ।

**जैनानां सप्तभङ्गीनयः** तत्त्वपूर्णः विचारणीयश्च वर्तते । ते यथा – १) स्यादस्ति द्रव्यम् २) स्यान्नास्ति द्रव्यम् ३) स्यादस्ति च नास्ति च द्रव्यम् ४) स्यादवक्तव्यं द्रव्यम् ५) स्यादस्ति च अव्यक्तञ्च द्रव्यम् ६) स्यान्नास्ति च अव्यक्तञ्च द्रव्यम् ७) स्यादस्ति च नास्ति च अव्यक्तञ्च द्रव्यम् इति ।

कायिक-वाचिक-मानसिकक्रियाः **"योगा"** इत्युच्यन्ते । एतेन कर्मपुद्गलः आत्मनि प्रविशति । तन्निरोधार्थं यः योगस्य प्रशस्तनिग्रहः सः **गुप्ति**रित्युच्यते । जैनदर्शने **तिस्रः गुप्तयो** भवन्ति । यथा –

१) मनोगुप्तिः (Control of Mind)

२) वचोगुप्तिः (Control of Speech)

३) कायोगुप्तिः (Control of Body)

**पञ्चसमितयः** (Five carefulness) – कर्मप्रवेशावरोधनार्थं पञ्च उपायाः जैनैः प्रोक्ताः । एत एव पञ्च समितयो भवन्ति । ताः यथा –

१) ईर्यासमितिः (Carefulness while walking)

२) भाषासमितिः (Carefulness while communicating)

३) एषणासमितिः (Carefulness while eating)

४) आदाननिक्षेपणसमितिः (Carefulness while handling their fly-whisks, water-guard etc.)

५) प्रतिष्ठापनसमितिः (Carefulness while disposing of bodily waste matter)

**चतस्रः निराहारप्रक्रियाः –**

१) पूर्णनिराहारः (Complete fasting)

२) अर्धनिराहारः (Partial fasting)

३) वृत्तिसंक्षेपः (Limiting the number of items of food eaten)

४) रसपरित्यागः (Giving up favourite foods)

**अष्टप्रकारिणी पूजा** – १) जलपूजा, २) चन्दनपूजा, ३) पुष्पपूजा, ४) दीपपूजा, ५) धूपपूजा, ६) अक्षतपूजा, ७) नैवेद्यपूजा, ८) फलपूजा च ।

**दश धर्माः** – क्षमा, मृदुता, सरलता, शौचम्, सत्यम्, संयमता, तपः, त्यागम्, औदासीन्यम्, ब्रह्मचर्यञ्च ।

**द्वादशानुप्रेक्षाः** – मुक्त्यर्थं साधकस्य द्वादशानुप्रेक्षाः (भावनाः) भवेयुः । यथा –

१) अनित्यम् (धर्मं विहाय सर्वमनित्यमिति भावना)

२) अशरण्यम् (सत्यं विहाय सर्वमशरण्यमिति भावना)

३) संसारः (जीवनमरणयोर्भावना)

४) एकत्वम् (जीवः स्वकर्मणः एक एव भागीति भावना)

५) अन्यत्वम् (आत्मा शरीराद्भिन्नः इति भावना)

६) अशुचिः (शरीरं शारीरिकं वस्तु वा च अपवित्रमिति भावना)

७) आस्रवम् (कर्मप्रवेशभावना)

८) संवरत्वम् (कर्मप्रवेशनिरोधस्य भावना)

९) निर्जरा (जीवप्रविष्टकर्मपुद्गलस्य बहिर्निष्क्रमणस्य भावना)

१०) लोकः (जीवात्मा, शरीरम्, जगच्चेति वस्तुनां भावना)

११) बोधिदुर्लभत्वम् (सम्यज्ज्ञानं, सम्यक् चरित्रं च दुर्लभमिति भावना)

१२) धर्मानुपेक्षा (धर्मानुष्ठानस्य भावना)

**परीषहः** – मुक्त्यर्थं कठोरनियमाः परीषहा इत्युच्यन्ते । ते द्वाविंशतिविधाः भवन्ति । यथा – क्षुधा, तृष्णा, शीतम्, औष्ण्यम्, दंशमशकम्, नग्नत्वम्, अरतिः, स्त्री, चर्या (एकान्तवासः), निषद्या (आसनधारणा), शय्या, आक्रोशः, वधम्, याचना, अलाभः, रोगः, तृणस्पर्शता, मलम्, सत्कारपुरस्कारः, प्रज्ञा, अज्ञानम्, अदर्शनम् इति ।

**पञ्च चरित्राणि** – १) सामाधिकचरित्रम्, २) छेदोपस्थापना (गुरोस्समीपे स्वीयपूर्वदोषान् स्वीकृत्य दीक्षाग्रहणम्), ३) परिहारविशुद्धिः ४) सूक्ष्मसम्परायः ५) यथाख्यातम् इति ।

**प्रमाणविचारः –** प्रमाणतत्त्वे जैनानां प्रमाणलक्षणमित्थमुक्तं यत् -"प्रकर्षणसंशयादित्यव- च्छेदेन मीयते परिछिद्यते शयते वस्तुतत्त्वं येन तत्प्रमाणम्" इति । सिद्धसेनदिवाकरमतानुसारं प्रमाणं स्वपराभासीत्युच्यते । वस्तुतः जैनदर्शने जीवगुणेषु प्रोक्तेन उपयोगाधारेणैव प्रमाणविचारः प्रस्तूयते । एतन्नये ज्ञानस्य सविकल्पभागे प्रतिपादिताः मतिः, श्रुतः, अविधिः, मनःपर्यायः, केवलमिति पञ्चभेदाः द्वयोः प्रमाणयोः प्रत्यक्षपरोक्षयोरन्तर्भवन्ति । एवमत्र प्रत्यक्षानुमानभेदेन प्रमाणं द्विविधं भवति । परन्तु भगवतीसूत्रे (५-३-१९२) प्रमाणं प्रत्यक्षानुमानौपम्यागमभेदाच्चतुर्धा प्रतिपादितमस्ति ।

**जैनशुभचिह्नानि –** जैनदर्शने अष्टौ शुभचिह्नानि भवन्ति । यथा – स्वस्तिकम्, श्रीवत्सम्, नन्द्यावर्त्यम्, वर्धमानकम्, भद्रासनम्, कलसम्, मीनयुगलम्, दर्पणश्चेति ।

**जैनमतसारः –** जिनदत्तसूरिणा जैनं मतमित्थमुक्तं –

**बलभोगोपभोगानामुभयोर्दानलाभयोः ।**
**अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम् ।**
**हिंसा रत्नरती रागद्वेषाववविरतिः स्मरः ।**
**शोको मिथ्यात्वमेतेऽष्टादश दोषा न यस्य सः ।।**
**जिनो देवो गुरुः सम्यक्ततत्त्वज्ञानोपदेशकः ।**
**ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्तनी ।।**
**स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि वा ।**
**नित्यानित्यात्मकं सर्वं नव तत्त्वानि सप्त वा ।।**
**जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च ।**
**बन्धो निर्जरणं मुक्तिरेषां व्याख्याऽधुनोच्यते ।।**
**चेतनालक्षणो जीवः स्वादजीवस्तदन्यकः ।**
**सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः ।।**
**आस्रवः स्रोतसो द्वारं संवृणोतीति संवरः ।**
**प्रवेशः कर्मणां बन्धो निर्जरस्तद्वियोजनम् ।।**

**अष्टकर्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन ।**

**पुण्यस्य संवरे पापस्यास्रवे क्रियते पुनः ।।**

**लब्धानन्तचतुष्कस्य लोकागूढस्य चात्मनः ।**

**क्षीणाष्टकर्मणो मुक्तिर्निव्यावृत्तिर्जिनोदिता ।।**

**सरोजहरणा भैक्षभुजो लुञ्चितमूर्धजाः ।**

**श्वेताम्बराः क्षमाशीलाः निस्सङ्गा जैनसाधवः ।।**

**लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्राः दिगम्बराः ।**

**ऊर्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ।।**

**भुङ्क्ते न केवली न स्त्री मोक्षमेति दिगम्बरः ।**

**प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह ।।** इति ।

एवं जैनानां सिद्धान्तः अधुना न केवलं भारतेऽपि तु भारताद्बहिरपि प्रचारितः प्रसारितश्चास्ति । इत्येवं प्रकारेण अस्य विहङ्गावलोकनं मया प्रस्तुतम्।

**शोधसन्दर्भग्रन्थसूची**


१. भारतीयसंस्कृतिपरिचयःलेखकः - डॉ.सुरेन्द्रकुमारमिश्रःसांविदीप्रकाशनम्, ४७. महोदधिमार्केट, मोचिसाहि पुरी - ७५२ ००१ ; षष्ठसंस्करणम् – २०१३

२. वैदिक साहित्य और संस्कृति (भाग - १-२), डॉ.किरण कुमारी,न्यू भारतीय बुक् कार्पोरेसन्स, ५५७४, ए.चौ.काशीराम मार्के, दुर्गा काम्प्लेक्स, न्यू चन्द्रावल, दिल्ली – ११०००६, संस्करण – २००१

३. संस्कृतसाहित्यस्य इतिहासः – प्रो.हरेकृष्णशतपथी, किताबमहल, कटक – १९९८

४. सर्वदर्शनसंग्रहः, श्रीमद्माध्वाचार्यविरचितः, उमाशंकर ऋषिः, चौखाम्वा विद्याभन्, वाराणसी,-१

५. भारतीय शिक्षा ओर् उसकी समस्या, पी.डी. पाठक्, अग्रवाल् पावलिकेशन् , आगरा-२